# आदर्श–प्रश्नमपत्रम्
## द्वादशी परीक्षा–2012–2013
## संस्कृत (सामान्यम्)

समय : घंटात्रयम् पूर्णाङ्काः 100

निर्देश :– (i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

1. उचितविकल्पं चित्वा लिखत– 1x7=7

(क) 'जगदीशः' इत्यस्मिन् पदे सन्धि अस्ति–

(अ) स्वर संधिः (ब) व्यंजन संधिः

(स) विसर्ग संधिः

(ख) 'चे+अनम्' इत्यस्य सन्धिः अस्ति–

(अ) चेनम् (ब) चैनम्

(स) चयनम् (द) चायनम्

(ग) सत्यं वद इत्यत्र सन्धि अस्ति–

(अ) विसर्ग सन्धिः (ब) दीर्घ सन्धिः

(स) गुण सन्धिः (द) व्यंजन सन्धिः

(घ) 'गुरूवचनम्' इत्यस्य पदस्य समास विग्रहः अस्ति–

(अ) गुरूवचन (ब) गुरोःवचनम्

(स) गुरूणा वचनं (द) गुखे वचनम्

(ड.) अष्टाध्यायी इत्यस्मिन् पदे समासः अस्ति–

(अ) द्विगु (ब) द्वन्द्वः

(स) तत्पुरूषः (द) कर्मधारयः

(च) अधोलिखितेषु अव्ययीभाव समासः नास्ति–

(अ) यथोशक्तिः (ब) उपगड्.गम्

(स) निर्मक्षिकम् (द) अनादरः

(छ) अधोलिखितेषु द्वन्द्व समासस्य उदाहरणम् अस्ति–

(अ) नियमसंयमौ (ब) महाराजः

(स) प्रजापति (द) पीताम्बरः

2. उचितविकल्पं चित्वा लिखत– 1x4=4

(क) अधोलिखितेषु अव्ययम् अस्ति–

(अ) ग्रामं (ब) गृहम्

(स) गम् (द) परा

(ख) अधोलिखितेषु अव्ययं नास्ति–

(अ) यदा (ब) कदा

(स) सदा (द) यथा

(ग) 'त्वं कदा गृहं गमिष्यति' इत्यस्मिन् वाक्ये अव्ययं अस्ति–

(अ) त्वं (ब) कदा

(स) गृहं (द) गमिष्यसि

(घ) 'सदाचारः एव परमोधर्मः' इत्यस्मिन् वाक्ये अव्ययम् अस्ति–

(अ) सदा (ब) चारः

(स) एव (द) परमो

प्रश्न 3 उचित विकल्पं चित्वा लिखत– 1x3=3

(क) 'भविष्यति' इत्यत्र लकारः अस्ति–

(अ) लट्लकारः (ब) लृट लकारः

(स) लड.लकारः (द) लोट लकार

(ख) 'ददति' इत्यत्र वचनम् अस्ति–

(अ) बहुवचनम् (ब) द्विवचनम्

(स) एकवचनम् (द) किमपि नास्ति

(ग) 'जानासि'इत्यस्मिन पदे पुरूष अस्ति–

(अ) उत्तमपुरूषः (ब) प्रथमपुरूषः

(स) मध्यमपुरूषः (द) कोऽपि नास्ति

प्रश्न 4 उचित विकल्पं चित्वा लिखत– 1x4=4

(क) 'सामाजिक' इत्यस्मिन पदे प्रत्ययः अस्ति–

(अ) ठक् (ब) णवुल

(स) अण् (द) मतुप

(ख) 'शिक्षिका' इत्यस्मिन पदे प्रत्ययः अस्ति –

(अ) टाप (ब) क्तिन्

(स) तृच् (द) मयट्

(ग) 'मुद+शानच इत्यत्र पदं भविष्यति –

(अ) मुदमान (ब) मोदवान्

(स) मोदान् (द) मोदमानः

(घ) 'ल्यप्' प्रत्ययस्य उदाहरणम् अस्ति–

(अ) गन्तव्यम् (ब) विहस्य

(स) गमनाथ् (द) हसित्वा

प्रश्न 5 क. 'सलिलम्' इत्यस्य पर्याय शब्दः अस्ति– 1x5=5

(अ) अलम् (ब) कुलम्

(स) धनम्' (द) जलम्ः

ख. दुर्बुद्धिः इत्यस्य विलोम शब्दः अस्ति–

(अ) कुबुद्धिः (ब) बुद्धिमान्

(स) सुबेद्धिः (द) मतिमान्

ग. 'अपवादः'इत्यस्य पदे उपसर्गः अस्ति–

(अ) अ (ब) आप

(स) अप (द) पवा

घ. भक्ष्यभक्षकयोर्मैत्री विपत्तेरेव––––––––। (अ) वारणम् (ब) कारणम्

ड. –––––––– चबु र्मनुष्याणाम्। (अ) ज्ञानं (ब) अज्ञानं

प्रश्न 6 उचित विकल्पं चित्वा लिखत– 1x3=3

क 'आत्मा' इत्यत्र वचनम् वचनम् अस्ति–

(अ) एकवचनम् (ब) बहुवचनम्

(स) द्विवचनम्

ख. 'विदुषा' इत्यत्र विभक्तिः अस्ति–

(अ) प्रथमा (ब) द्वितीया

(स) तृतीया

ग. अधोलिखितेषु सप्तमी विभक्ति अस्ति–

(अ) पूर्वेण (ब) पूर्वेषु

(स) पूर्वैः (द) पूर्वौ

प्र.7 'अ' स्तम्भस्य वाक्यान् 'ब' स्तम्भस्य वाक्यै सह यथोयाग्यं संयोजयत– 1x4=4

| | (अ) | | (ब) |
|---|---|---|---|
| (i) | छादनम् | – | अपर्णे |
| (ii) | हसस्य | – | अज्ञातायाः |
| (iii) | धैर्यगुणः | – | दुग्धजल भेद विधौ |
| (iv) | बालमृगाक्षि | – | प्रमार्ष्टुम |

प्र.8 अधोलिखितेषु चतुर्णां प्रश्नानाम् उत्तराणि एकपदेन लिखत्– 1x4=4

क) कण्वस्य पुत्र्याः नाम किम् ?

ख) यथार्थ सौन्दर्य केषां प्रत्यक्षं भवति ?

ग) सोमस्य सुतः कः ?

घ) आर्यावर्त स्फोटप्रवादः कुत्र आसीत् ?

ड.) गड्.गालहरी केन निर्मिता ?

प्र.9 अधोलिखितेषु त्रयाणां प्रश्नानाम् उत्तराणि एकवाक्येन लिखत– 2x3=6

क) किं नाम सतीत्वम् ?

ख) अघायुरिन्द्रियारामः कः ?

ग) साड्ख्यदर्शनानुसारेण भूतवादः किम् अस्ति ?

घ) द्रौपदी युधिष्ठिरं किमर्थं प्रेरयति ?

प्र.10 पंच अशुद्धकारवाक्यानां शुद्धिः करणीया – 5

क) सरस्वतीं नमः।

ख) पायैः जुगुप्सते।

ग) सुरेशः विद्यालयस्य प्रति गच्छति।

घ) माता बालकेन दुग्धं ददाति।

ड.) नगरस्थ बहिः वनम् अस्ति।

च) शिक्षकाय सह छात्राः विद्यालयं गच्छन्ति।

प्र.11 अधोलिखितेषु एकस्य कवेः संक्षिप्तपरिचयं लिखत – 4

(क) कालिदासः (ख) बाण भट्टः (ग) भासः

प्र. 12 प्रदतैः शब्दैः अनुच्छेदलेखनम् कुरुत– 4

(षट्, भवति, प्रमोदो, नृत्यन्ति, वसन्तः, उत्सवै, नराः, पूर्णिमायां, हर्षातिरेकेण)

भारते———————— ऋतवः सन्ति। तेषु ——————— ऋतुराजः कथ्यते। चैत्रे वैशाखे च मासे वसन्त———————। वसन्तौ द्वौ प्रमुखौ——————— भवतः वसन्तोत्सवः होलिकोत्सवः च। वसन्तोत्सवे सर्वत्र——————— भवतिं। ————————नार्यश्च सर्वत्र गायन्ति———————च। होलिकोत्सवः फाल्गुनमासस्य———————भवति।———————नराः, नार्थ, युवानः, वृद्धाः बालकाश्च प्रसन्नाः भवन्ति।

प्र.13 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् सुभाषितद्वयं लिखत। 4

प्र. 14 प्रदत्तैः शब्दैः चतुर्णां वाक्यानां रिक्तस्थानपूर्तिं कुरूत– 4

निनादय, शरदः, सनीरे, संयतो, सत्यव्रत

क) सुखार्थी––––––––– भवेत।

ख) वहति मन्दमन्दं––––––– समीरे।

ग) –––––––––नवीनामये वाणि ! वीणाम्।

घ) जीवेम––––––––– शतम्

ड.) आसीत् पुरा–––––––– महाराज!

प्र.15 अधोलिखितेषु एकस्य साहित्यिकं परिचयं लिखत। 4

(क) पुराणम् (ख) महाभारतम् (ग) रामायणम्

प्र.16 अधोलिखित अपठित गद्यांशं सम्यक् पठित्वा प्रश्नानामुत्तराणि संस्कृत भाषायाम् लिखत– 5

(अ) त्याग–तपस्या–परोपकाराश्च भारतीय संस्कृते अलड्.कारभूताः सन्ति। वर्णाश्रम व्यवस्था भारतीय संस्कृते महती विशेषता वर्तते। इयं व्यवस्था एव सामाजिक व्यवस्थायाः महतीं विशेषता वर्तते। इयं व्यवस्था एव सामाजिक व्यवस्थायाः आधार शिला। ब्रह्मचर्य–गृहस्थ–वानप्रस्थ–सन्यासश्चेति चत्वाराः आश्रमाः। आश्रमधर्मपालनेन जीवनं दिव्यगुणैः समन्वितं भवती। सदाचारो भारतीयसंस्कृतेः सारः। सदाचारनियमपालनं यज्ञसदृशं भवति।

(क) भारतीय संस्कृतेः महती विशेषता का ?

(ख) भारतीय संस्कृतेः अलड्.कार भूताः के ?

(ग) आश्रमधर्म पालनेन जीवनं कैः गुणैः समन्वितं भवति ?

(घ) भारतीय संस्कृतेः सारः कः ?

(ड.) अपठितगद्यांशस्य शीर्षकं लिखत।

प्र.17 अधोलिखितगद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि लिखत– 8

(अ) आसीत् पुरा कश्चित सत्यव्रतो नाम महाराजः। सः सत्यमेव जीवितधर्म स्वीकृत्य, जीवितलक्ष्यं च समाचरन् सर्वेषाम् आदर्शो व्यराजत। एकदा ब्रह्ममुहुर्ते शयनादुत्थय नदीस्नानार्थ प्रस्थितः। सिंहद्वार समीपे कांचित सुन्दरी सवेंग बहिर्गच्छन्ती दृष्ट्वा पृष्टवान्– अयि ! सुन्दरी का त्वं राजभवनात् किमर्थं निर्गच्छसि ?

(क) महाराजः सिंहद्वार समीपे काम् अपश्यत् ?

(ख) महाराजस्य नाम किम् आसीत् ?

(ग) शयनादुत्थाय महाराजः कुत्र प्रस्थितः ?

(घ) दृष्ट्वा इत्यस्मिन् पदे कः प्रत्ययः ?

(ख) सम्प्रति महाघातकानि अस्त्राणि अस्माभिः निर्मीयन्ते। पृथिव्यां वायुमण्डले च तेषा प्रयोगः परीक्षणं वा क्रियते। तेन तापक्रमो वर्धते। आजोननामपरतं स्वयमेव विश्वस्य कृते महत्सङ्.कटम्। वाहनानि अपि वायुमंडलं दूषयन्ति। तेन वृद्धो युवानो बालश्च सर्वे प्रभाविताः। रोगाः प्रवृद्धिं यान्ति

(क) के प्रवृद्धिं यान्ति ?

(ख) वायुमण्डलं कानि अपि दूषयन्ति ?

(ग) सम्प्रति अस्माभिः कानि निर्मीयन्ते ?

(घ) प्रदूषणेन के प्रभाविताः ?

(ग) पाडलपुरनगरे देवशर्मणो द्विजस्य सोम शर्मा सुतोऽभूत्। सः दक्षिणदिशि सरस्वतीलब्ध प्रसाद चंगदेवगुरोः पार्श्वे षोडशवर्षाणि यावतां चतुर्दशविद्याः साङ्.गोपाङ्.गा अधीत्य बहुपरिवारोपेतस्तं गुरूमुत्कलाप्य स्वकीयपुरं प्रति चचाल। गुरूणा शिक्षा दत्ता।

(क) सोमशर्मा कति विद्याः अधीतवान् ?

(ख) कस्य सुतः सोमशर्मा अभूत ?

(ग) केन शिक्षा दत्ता ?

(घ) 'बहुपरिवारोपेतस्तम्' इत्यस्य पदस्य संधिः विच्छेदं कुरूत।

प्र. 18 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि लिखत– 8

(अ) आत्मा त्वं गिरिजामतिः सहचराः प्राणाः शरीरम् गृहम्।
पूजा ते विषयापभोगरचना निन्द्रा समाधिस्थितिः,
संचारः पदयोः प्रदक्षिणविधिः स्त्रोत्राणि सर्वा गिरः
यद्यात्कर्म करोमि तत्त दखिलं शम्भो ! तवाराधनम्।।

(क) ते पूजा का ?

(ख) सर्वाः गिर कानि ?

(ग) समाधिस्थितिः का ?

(घ) शम्भो अखिलम् आराधंन किम् ?

ख– अन्नात् भवन्ति भूतानि, पर्जन्यादन्नसम्भवः ।
यज्ञात् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।।

(अ) कस्मात् अन्नसम्भवः ?

(ब) भूतानि कस्माद् भवन्ति ?

(स) यज्ञात कः भवति ?

(द) 'भवन्ति' इत्यत्र किं वचनम् ?

(ग) न वैरमुद्दीपयति प्रशान्तं, न दर्पमारोहति नास्तमेति।

न दुर्गतोऽस्मिति करोति मन्युं, तमार्यशीलं परमाहुरार्याः।।

(अ) आर्यशीलं किं न उद्दीपयति ?

(ब) आर्यशीलं किं न आरोहति न च अस्तमेति ?

(स) के तम् आर्यशीलं परमाहुः ?

(द) 'करोति' इत्यत्र कः पुरूषः ?

प्र. 19 स्थानान्तरणप्रमाण पत्रं स्वीकर्तुं स्वस्य प्राचार्यस्य कृते प्रार्थनापत्रं संस्कृते लिखत। 4

अथवा

छात्रवृत्तिप्राप्त्यर्थ स्वस्य प्राचार्यस्य कृते प्रार्थना पत्रं संस्कृते लिखत।

प्र.20 अधोलिखितेषु एकस्मिन् विषयं स्वीकृत्य संस्कृत भाषायाम् शत शब्देषु निबन्धम् लिखत। 10

(अ) परोपकारः

(ब) ग्राम्यजीवनम्

(स) अस्माकं देशः

(द) संस्कृतभाषायाः गौरवम्।

# आदर्श–उत्तरपत्र
# द्वादशी परीक्षा–2012–13
# संस्कृत (सामान्यम्)

| | | | | |
|---|---|---|---|---|
| (1) | (क) | ब. | व्यंजन संधिः | 7 |
| | (ख) | स. | चयनम् | |
| | (ग) | द | व्यंजन संधिः | |
| | (घ) | ब | गुरोः वचनम् | |
| | (ङ.) | अ | द्विग | |
| | (च) | द | अनादरः | |
| | (छ) | अ | नियमसंयमौ | |

नोटः– प्रत्येक सही उत्तर पर 1 अंक प्राप्त होगा।

| | | | | |
|---|---|---|---|---|
| (2) | (क) | द | परा | 4 |
| | (ख) | स | सदा | |
| | (ग) | ब | कदा | |
| | (घ) | स | एव | |

नोटः– प्रत्येक सही उत्तर पर 1 अंक प्राप्त होगा।

| | | | | |
|---|---|---|---|---|
| (3) | क | ब | लृट्लकारः | 3 |
| | ख | अ | बहुवचनम् | |
| | ग | स | मध्यम् पुरूषः | |

नोटः– प्रत्येक सही उत्तर पर 3 अंक प्राप्त होगें।

| | | | | |
|---|---|---|---|---|
| (4) | क | स | ठक् प्रत्ययः | 4 |
| | ख | अ | टाप् प्रत्ययः | |
| | ग | द | मोदमानः | |
| | घ | ब | विहस्य | |

नोटः– प्रत्येक सही विकल्प चयन पर चार अंक प्राप्त होंगे।

| | | | |
|---|---|---|---|
| (5) | क | द | जलम् | 5 |
| | ख | स | सुबुद्धिः | |
| | ग | स | अप | |
| | घ | ब | कारणम् | |
| | ड. | अ | ज्ञानं | |

नोटः— प्रत्येक सही विकल्प चयन पर 5 अंक प्राप्त होंगे।

| | | | | |
|---|---|---|---|---|
| (6) | क | अ | एकवचनं | 3 |
| | ख | स | तृतीया | |
| | ग | ब | पूर्वेषु | |

नोटः— प्रत्येक सही विकल्प चयन पर तीन अंक प्राप्त होंगे।

| | | | | |
|---|---|---|---|---|
| (7) | | अ | ब | 4 |
| | क) | छादनम् | अज्ञतायाः | |
| | ख) | हंसस्य | दुग्धजलभेदविधौ | |
| | ग) | धैर्यगुणः | प्रमार्ष्टुम् | |
| | घ) | बालमृगाक्षि | अपर्णे | |

नोटः— प्रत्येक सही जोड़ी पर एक अंक प्राप्त होंगे।

(8) क) शकुन्तला — 4

ख) समाहितानां साधकानाम्

ग) बुधः

घ) व्याकरणेषु

ड.) पण्डितराज—जगन्नाथेन

नोटः— प्रत्येक सही उत्तर पर 1 अंक निर्धारित है।

(9) क) चांचल्यविहीनः संयमः एव सतीत्वम् — 6

ख) यः प्रवर्तितं चक्रं न अनुवर्तयति सः अघायुः इन्द्रियारामः।

ग) साड.ख्यदर्शनानुसारेण पंचतत्त्वैः सृष्टिरचना एव भूतवादः अस्ति।

घ) द्रौपदी युधिष्ठिरं शत्रून पराजेतुं पुनः राज्यप्राप्तत्यर्थ च प्रेरयति।

नोटः— कोई तीन प्रश्नों के उत्तर एक वाक्य में सही लिखने पर 6 अंक प्राप्त होंगे।

(10) क) सरस्वत्यै नमः। 5

ख) पपात् जुगुप्सते।

ग) सुरेशः विद्यालयं प्रति गच्छति।

घ) माता बालकाय दुग्धं ददाति।

ड.) नगरात् बहिः वनम् अस्ति।

च) शिक्षकेः सह छात्राः भोपालं गच्छन्ति।

नोटः– कोई पांच वाक्य शुद्ध करने पर 5 अंक प्राप्त होंगे।

(11) क) कालिदासः 4

महाकवि कालिदासस्य प्रादुर्भावः प्रायः पंचम्यां शताब्द्यां स्वीक्रियते। कालिदासः. महाकाव्ये, त्रीणि नाटकानि, द्वे खण्डकाव्ये च अरचयत्। तद्यथा महाकाव्यद्वयम्–रघुवंशम् कुमार सम्भवम्, नाटकानि अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम् विक्रार्वशीयम् च, खण्डकाव्यदृयमऋतुसंहारम्, मेघदूतम्। कालिदासस्य रचनाशैली वैदर्भी अस्ति। भाषा लावण्यमयी सरला च अस्ति। अस्य सर्वाणि नाटकानि श्रङ्.गारस युक्तानि सन्ति। मेघदूतस्य कथावस्तु कविकल्पितमस्ति। ऋतु संहार खण्काव्ये षष्णाम् ऋतूनां वर्णनमस्ति।

———————————

बाण भट्ट

वात्स्यायन गोत्रोत्पन्नः बाणभट्टः सप्तम्यां शताब्द्यां प्रादुरभूत् संस्कृतसाहित्यस्य श्रेष्ठगद्यरचनाकाररूपेण अस्य कवेः प्रसिद्धिमस्ति। शोणभद्र नदीतटे प्रीतिकूटक्षेत्रे बाणस्य शैशवं व्यतीतम्। हर्षचरितस्य आरम्भे गद्ये बाणेन स्ववंशस्य परिचयः दत्तोऽस्ति। 'हर्षचरितं लक्षणग्रन्थानुसारम् आख्यायिका अस्ति। अस्याम् आख्यायिकायाम् अष्टौ उच्छवासाः सन्ति। बाणभट्टस्य अपरः ग्रन्थः' कादम्बरी अस्ति।

————————

भासः

संस्कृते साहित्ये महाकवि भासः जाज्वल्यमानमणिः इव प्रकाशते। सः संस्कृतस्य आद्यनाटककारः कथ्यन्ते। तेन विरचितानि दूतवाक्यम्, कर्णभारम्, दूतघटोत्कचम्, मध्यमव्यायोगः, पंचरात्रम्, ऊरूभङ्.गम, अभिषेकनाटकम्, बालचरितम्, अभिषेकनाटकम्, प्रतिमानाटकम्,

प्रतिज्ञायौगन्धरायणम्, स्वप्नवास वदतम्, अविमारकम् चारूदत्तम् इत्यादीनि त्रयोदश नाटकानि प्रसिद्धानि। तेषु नाटकेषु ''स्वप्नवासवदत्तम्'' नाम नाटकमति प्रसिद्धम्। नाटकेऽस्मिन् कवेः नाटयकतायाः उत्कृष्टता दृश्यते।

(12) अनुच्छेद लेखमन् 4

भारते षट् ऋतवः सन्ति। तेषु वसन्तः ऋतुराजः कथ्यते। चैत्रे वैशाखे च मासे वसन्तः भवति। वसन्तौ द्वौ प्रमुखौ उत्सवौ भवतः वसन्तोत्सवः होलिकोत्सवः च। वसन्तोत्सवे सर्वत्र प्रमोदो भवति। नराः नार्यश्च सर्वत्र गायन्ति नृत्यन्ति च होलिकोत्सवः फाल्गुनमासस्य पूर्णिमायां भवति। हर्षातिरेकेण नराः नार्यः, युवानः, वृद्धाः, बालकश्च प्रसन्नाः भवन्ति।

13 पाठ्यपुस्तकात् सुभाषित द्वयम् शुद्धश्लोकलेखनेन पूर्ण अङ्.का प्रदेयाः। 4

14. रिक्तस्थानं पूर्तिः 4

क) संयतो

ख) सनीरे

ग) निनादय

घ) शरदः

ड.) सत्यव्रतः

15. संस्कृत भाषायां एकम् विषयं स्वीकृत्य चत्वारिशत् शब्दे साहित्यपरिचयम् लिखत– 4

पुराणम्

पुराणानि अष्टादश स्मृतानि। तेषां रचयिता वेदव्यासः इति परम्परा विवेचनानुसार पुराणानि पंचधा विभक्तानि।

1. सृष्टयुत्पतेः वर्णनम्।
2. सृष्टिपलयलक्रिया।
3. राज्ञां वंशावलिः।
4. मन्वतर–दिव्ययुगानां वर्णनम्।
5. राजवंशानुचरितम्।

एतानि अतिरिच्य अष्टादशोपपुराणानि अपि प्राप्तानि।

–––––––

महाभारतम्

वीरशान्तरसयुक्त–महाभारतम् ऐतिहासिक काव्यत्वेन विख्यातम्। महर्षिणा कृष्णद्वैपायनेन महाभारतस्य रचना कृता इति परम्परा। अयमेव वेदव्यासः इति श्रुयते। एतस्य विकासक्रमानुसारेण 'जयम्' इति प्रथम, 'भारतम्' इति द्वितीयम् 'महाभारतम्' इति तृतीयम् इति त्रीणि नामानि सन्ति। अस्मिन् काव्ये लक्षाधिकाश्लोकाः सन्तिः। तेषां विद्यमान्त्वात् शतसहस्त्रीनाम्ना एतत् प्रसिद्धम्।

काव्यमिदम् अष्टादश–पर्वषु विभक्तं पर्वक्रमः एवमस्ति आदि–सभा–वन–विराड–उद्योग–भीष्म–द्राण–कर्ण–शल्य सौप्तिक–स्त्री–शान्ति–अनुशास–आश्वमेधिक–आश्रमनासिक–कौशल–महाप्रास्थानिक–स्वर्गारोहणा इति। काव्यस्य रचना कालस्तावत ई.पू. 400 वर्षाणि इति विदुषां मतम्।

———————

रामायणम्

महर्षि–बाल्मीकि–विरचितम् आदिकाव्यं रामायणम् लोकविश्रुतम्। रामयणे काव्ये बाल्मीकिना ब्रह्मणः प्रेरणया रामचरितं विरचितम्।

रामायणी कथा सप्तकाण्डेषु चतुर्विशति–सहस्रश्लोक युक्ता उपलभ्यते। अत्र आदि कविना मर्यादापुरूषोत्तमस्य श्रीरामस्य आदर्श पुरूषत्व मातृ–पितृ देवातिथि–प्रजा–पुत्र–भ्रातप्रेम–व्यवहाराणामुचित–वर्णनं कृतम्। रामायणस्य रचनाकालः प्रायः ई.पू. 600 वर्षतः पूर्वमिति विदुषां मतम्।

16. अपठितगद्यांशम् 5

क) वर्णाश्रमव्यवस्था भारतीय संस्कृते महती विशेषता।

ख) त्याग–तपस्या–परोपकाराश्च भारतीय संस्कृतः अलङ.कारभूताः।

ग) आश्रमधर्मपालनेन जीवनं द्विव्यगुणैः समन्वितं भवति।

घ) सदाचारो भारतीय संस्कृते सारः।

ङ.) भारतीय संस्कृतिः।

17. अ) गद्यम् 8

क) महाराजः सिंहद्वारसमीपे कांचित सुन्दरीम् अपश्यत्।

ख) महाराजस्य नाम सत्यव्रतः आसीत्।

ग) शयनादुत्थाय महाराजः नदीस्थानार्थं प्रस्थितः।

घ) 'क्त्वा' प्रत्ययः।

ब)

क) रोगाः प्रवृद्धिं यान्ति।

ख) वाहनानि अपि वायुमण्डलं दूषयन्ति।

ग) सम्प्रति महाघातकानि अस्त्राणि अस्माभिः निर्मीयन्ते।

घ) प्रदूषणेन वृद्धो युवानो बालश्च सर्वे प्रभाविताः।

स)

क) सोमशर्मा चतुर्दशविद्याः अधीतवान्।

ख) देवशर्मणो द्विजस्य सोमशर्मा सुलोऽभूत्।

ग) गुरूणा शिक्षा दत्ता।

घ) बहुपरिवारोपेतः + तम्।

18. पद्यम 8

अ)

क) पूजा ते विषयोपभोग रचना।

ख) स्तोत्राणि सर्वा गिरः।

ग) समाधिस्थितिः निद्रा।

घ) यद्यत्कर्म करोमि तत्तदखिलं शम्भोः आराधनम्।

ब)

क) पर्जन्यात् अन्नसंभवः।

ख) भूतानि अन्नात् भवन्ति।

ग) यज्ञात् पर्जन्यः भवति।

घ) बहुवचनम्

स)

क) आर्यशीलं वैरं न उद्दीपयति।

ख) आर्यशीलं न दर्पमारोहति नास्तमेति।

ग) आर्याः तम् आर्यशीलं परमाहुः।

घ) प्रथमपुरूषः।

उत्तर 19

स्थानान्तरणम्–प्रमाणपत्रम् 4

सेवायाम्,

श्रीमन्तः प्राचार्य महोदयाः

उत्कृष्ट विद्यालयः

बालाघाटः

विषयः– स्थानान्तरण प्रमाणपत्रं प्राप्तयर्थम् आवेदनम्।

महोदयाः,

सादरं निवेदयामि यत् मम पितुः स्थानान्तरणं जबलपुर नगरे संजातम्। सकलः परिवारः अग्रिमे रविवासरे जबलपुरं नगरं गमिष्यति। अहम् अपि जबलपुर नगरे एव अध्ययनं कर्तुम् इच्छामि।

अतः विद्यालय स्थानान्तरण प्रमाण पत्रं दत्त्वा भवन्तः मयि अनुग्रहं कुर्वन्तु इति प्रार्थये।

दिनाँक भवतः आज्ञाकारी

24.8.2012 शिष्यः– हर्षलः

उत्कृष्ट विद्यालयः

बालाघाटः।

अथवा

छात्रवृत्ति प्रदानार्थम् आवेदनम्

माननीयाः,

प्राचार्य महोदयाः

शासकीय–उच्चतर–माध्यमिक विद्यालयः

तेवरः जबलपुरः

विषयः– छात्रवृत्ति प्रदानार्थम् आवेदनम्।

महोदयः

अहं सविनयं निवेदयामि यत् मम पितुः आर्थिकस्थितिः शोचनीया वर्तते। अहं शिक्षण–शुल्कम् अपि दातुम् असमर्थः अस्मि। अतः मम कृते श्रीमन्तः छात्रवृत्तिं दापयन्तु इति प्रार्थये।

दिनाँक

24.8.2012 विनयावता

कमलेशः

कक्षा–दशम व वर्गः

————————

उ. 20 निबन्धः 10

परोपकारः

किमपि प्रत्यर्पणमनभिलष्य परकीयहितानुसंधानं परोपकारः। इयं पृथ्वी अस्मभ्यं भोजनं जलं पाथयति च। सूर्यः प्रकाशमर्पयति चन्द्रमा अस्मानं सुधया प्राणयति परम् सहे अस्मत् किमपि न अभिलषन्ति। परोपकारात् प्रबलं किमपि पुण्यमंत्र। जगति नास्ति। बुभुक्षितेभ्यां भोजनस्य, पिपासितेभ्यः पयसः वस्त्रहीनेभ्यो वस्त्रस्य धनं सड.कटापन्नानां प्राणत्यागं परापेकारिणा प्रधानतया करणीयम्। विद्यादानमपि परोपकारस्य श्रेष्ठो मार्गः। शास्त्रेषु परापेकारस्य महती प्रशंसा कृता। तथा हि –

अष्टादश पुराणेषु, व्यासस्य वचन द्वयम्।

परोपकारः पुण्याय पापाय परपीऽनम्।।

———————

ग्राम्यजीवनम्

भारतं ग्रामाणां देशः। भारतीय जनंसख्यायाः बहुलांशः ग्रामेषु वसति। ग्रामेषु कृषकाः श्रमिकाश्च वसन्ति। तेषां मुख्यव्यवसायो कृषिः अस्ति। ते पशून पालयन्ति। धेनोः वत्साः क्षेत्रकर्षणे उपयोगिनः भवन्ति। ग्रामवासिनः निर्धनाः अतः सन्तुलितं भोजनं न सुलभं तेभ्यः।

ते निम्नजीवनस्तराः सन्ति। ग्रामेषु समुपयोगिनां गृहानां अभावो विद्यते। कतिपयेषु ग्रामेषु शुद्ध जलस्यापि अभावः दृश्यते।

ग्रामे प्रकृतिसौनदर्यमपि वर्तते। इतस्ततः वृक्षाः तिष्ठन्ति। वनशोभा अपि दर्शनीया अस्ति। ग्रामे नदी तडागों अपि भवतः। प्रभाते सायंकाले च नदीपर्वतयोः शोभा हृदयं रंजयति। अतएव कथितम् ''अहो रम्यं ग्रामजीवनम्''

———————

## संस्कृत भाषायाः गौरवम्

अस्मिन् संसारे असंख्याः भाषाः सन्ति। तासु संस्कृतभाषा प्राचीना सर्वोत्तमा विद्यते। संस्कृत। परिष्कृता दोषरहिता भाषा निगधते। इयमेव भाषा अमरभारती, गीर्वाणी, देवभाषा, सुरवाणी इत्यादिभि शब्दैः सम्बोध्यते।

संस्कृतभाषा जगतः सर्वासां भाषाणां जननी वर्तते भारतस्य तु सर्वाः एव भाषाः अस्था पुत्र्यः सन्ति। प्रायः संसारस्य सर्वेषु देशेषु संस्कृत ग्रन्थानाम् अध्ययनं क्रियते। आदिकाव्यं रामायणं शान्त रस पूर्ण वीरकाव्यं महाभारतमपि संस्कृते गौरवं वर्धयतः। गीता नामकं ग्रन्थरत्नं के न जानन्ति ? संस्कृतभाषा सड्.गणकोपयुक्तिास्ति संस्कृतं प्राणिमात्रस्य कल्याणं कल्पयति विश्वं चैकस्मिन् सूत्रे बध्नाति। अतः संस्कृतं संरक्षणीयम्।

————————

## अस्माकं देशः

विश्वस्मिन् अस्माकं भारतं महान् देशः। भारत वर्षो हि पुरा आर्यावर्तः कथ्यते स्म। अस्य देशस्य उत्तरस्यां दिशि पर्वतराजो हिमालयः इयं रक्षति। अस्य देशस्य दक्षिणतश्च महान् जलधि वर्तते। शत्रवः एनम् आक्रान्तं सहसा न प्रभवन्ति स्म। अत्र गड.गादय सरितः सुधोपमं जलं प्रवहन्ति। तस्मादेव देवाः अपि अस्य गीतं गायन्ति–

गायन्ति देवाः किल गीतकानि।।<br>
धन्यास्तु ये भारतभूमि भागे।।<br>
स्वगपवर्गास्पदमार्ग भूते।।<br>
भवन्ति भूयः पुरूषाः सुरत्वात्।।

मध्यकाले देशाऽयं पराधीनो जातः। वर्तमानसमये पुनरपि स्वतन्त्रदेशोऽयं विश्वे विशिष्टं स्थानं लभते। अयं हि आत्म वत् सर्वभूतेषु पश्यति। आत्मनः प्रतिकूलानि परेषां न समाचरेत् इत्यादीन् आदर्शान् ज्ञापयति। देशोऽयं वैज्ञानिक युगेऽपि सर्वेषां देशानां श्रेष्ठो भविष्यति।

निर्देशः– कोई एक निबंध कम से कम दस वाक्यों में लगभग 100 शब्दों में लिखने पर 10 अंक प्राप्त होंगे।